अमृतसंजीवन धन्वंतरि स्तोत्रं

अमृतसंजीवन धन्वंतरि स्तोत्रं

अथापरमहं वक्ष्येऽमृतसंजीवनं स्तवं |
यस्यानुष्ठानमात्रेण मृत्युर्दूरात्पलायते || 1 ||

असाध्याः कष्टसाध्याश्च महारोगा भयंकराः |
शीघ्रं नश्यंति पठनादस्यायुश्च प्रवर्धते || 2 ||

शाकिनीडाकिनीदोषाः कुदृष्टिग्रहशत्रुजाः |
प्रेतवेतालयक्षोत्था बाधा नश्यंति चाखिलाः || 3 ||

दुरितानि समस्तानि नानाजन्मोद्भवानि च |
संसर्गजविकाराणि विलीयंतेऽस्य पाठतः || 4 ||

सर्वोपद्रवनाशाय सर्वबाधाप्रशांतये |
आयुः प्रवृद्धये चैतत् स्तोत्रं परममद्भुतं || 5 ||

बालग्रहाभिभूतानां बालानां सुखदायकं |
सर्वारिष्टहरं चैतद्बलपुष्टिकरं परं || 6 ||

बालानां जीवनायैतत् स्तोत्रं दिव्यं सुधोपमं |
मृतवत्सत्वहरणं चिरंजीवित्वकारकं || 7 ||

महारोगाभिभूतानां भयव्याकुलितात्मनां |
सर्वाधिव्याधिहरणं भयघ्नममृतोपमं || 8 ||

अल्पमृत्युश्चापमृत्युः पाठादस्यः प्रणश्यति |
जलाऽग्निविषशस्त्रारि न हि शृंगि भयं तथा || 9 ||

गर्भरक्षाकरं स्त्रीणां बालानां जीवनप्रदं |
महारोगहरं नृणामल्पमृत्युहरं परं || 10 ||

बाला वृद्धाश्च तरुणा नरा नार्यश्च दुःखिताः |
भवंति सुखिनः पाठादस्य लोके चिरायुषः || 11 ||

अस्मात्परतरं नास्ति जीवनोपाय ऐहिकः |
तस्मात् सर्वप्रयत्नेन पाठमस्य समाचरेत् || 12 ||

अयुतावृत्तिकं वाथ सहस्रावृत्तिकं तथा |
तदर्धं वा तदर्धं वा पठेदेतच्च भक्तितः || 13 ||

कलशे विष्णुमाराध्य दीपं प्रज्वाल्य यत्नतः |
सायं प्रातश्च विधिवत् स्तोत्रमेतत् पठेत् सुधीः || 14 ||

सर्पिषा हविषा वाऽपि संयावेनाथ भक्तितः |
दशांशमानतो होमं कुर्यात् सर्वार्थसिद्धये || 15 ||

अथ स्तोत्रं |
नमो नमो विश्वविभावनाय
नमो नमो लोकसुखप्रदाय |
नमो नमो विश्वसृजेश्वराय
नमो नमो मुक्तिवरप्रदाय || 1 ||

नमो नमस्तेऽखिललोकपाय
नमो नमस्तेऽखिलकामदाय |
नमो नमस्तेऽखिलकारणाय
नमो नमस्तेऽखिलरक्षकाय || 2 ||

नमो नमस्ते सकलार्तिहर्त्रे
नमो नमस्ते विरुजः प्रकर्त्रे |
नमो नमस्तेऽखिलविश्वधर्त्रे
नमो नमस्तेऽखिललोकभर्त्रे || 3 ||

सृष्टं देव चराचरं जगदिदं ब्रह्मस्वरूपेण ते
सर्वं तत्परिपाल्यते जगदिदं विष्णुस्वरूपेण ते |
विश्वं संह्रितये तदेव निखिलं रुद्रस्वरूपेण ते
संसिच्यामृतशीकरैर्हर महारिष्टं चिरं जीवय || 4 ||

यो धन्वंतरिसंज्ञया निगदितः क्षीराब्धितो निःसृतो
हस्ताभ्यां जनजीवनाय कलशं पीयूषपूर्णं दधत् |
आयुर्वेदमरीरचज्जनरुजां नाशाय स त्वं मुदा
संसिच्यामृतशीकरैर्हर महारिष्टं चिरं जीवय || 5 ||

स्त्रीरूपं वरभूषणांबरधरं त्रैलोक्यसम्मोहनं
कृत्वा पाययति स्म यः सुरगणान् पीयूषमत्युत्तमं |
चक्रे दैत्यगणान् सुधाविरहितान् संमोह्य स त्वं मुदा
संसिच्यामृतशीकरैर्हर महारिष्टं चिरं जीवय || 6 ||

चाक्षुषोदधिसंप्लाव भूवेदप झषाकृते |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 7 ||

पृष्ठमंदरनिर्घूर्णनिद्राक्ष कमठाकृते |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 8 ||

यांचाच्छलबलित्रासमुक्तनिर्जर वामन |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 9 ||

धरोद्धार हिरण्याक्षघात क्रोडाकृते प्रभो |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 10 ||

भक्तत्रासविनाशात्तचंडत्व नृहरे विभो |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 11 ||

क्षत्रियारण्यसंछेदकुठारकररैणुक |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 12 ||

रक्षोराजप्रतापाब्धिशोषणाशुग राघव |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 13 ||

भूभारासुरसंदोहकालाग्ने रुक्मिणीपते |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 14 ||

वेदमार्गरतानर्हविभ्रांत्यै बुद्धरूपधृक् |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 15 ||

कलिवर्णाश्रमास्पष्टधर्मर्ध्यै कल्किरूपभाक् |
सिंच सिंचामृतकणैश्चिरं जीवय जीवय || 16 ||

असाध्याः कष्टसाध्या ये महारोगा भयंकराः |
छिंधि तानाशु चक्रेण चिरं जीवय जीवय || 17 ||

अल्पमृत्युं चापमृत्युं महोत्पातानुपद्रवान् |
भिंधि भिंधि गदाघातैश्चिरं जीवय जीवय || 18 ||

अहं न जाने किमपि त्वदन्यत्
समाश्रये नाथ पदांबुजं ते |
कुरुष्व तद्यन्मनसीप्सितं ते
सुकर्मणा केन समक्षमीयां || 19 ||

त्वमेव तातो जननी त्वमेव
त्वमेव नाथश्च त्वमेव बंधुः |
विद्याधनागारकुलं त्वमेव
त्वमेव सर्वं मम देवदेव || 20 ||

न मेऽपराधं प्रविलोकय प्रभो-
-ऽपराधसिंधोश्च दयानिधिस्त्वं |
तातेन दुष्टोऽपि सुतः सुरक्षते
दयालुता तेऽवतु सर्वदाऽस्मान् || 21 ||

अहह विस्मर नाथ न मां सदा
करुणया निजया परिपूरितः |
भुवि भवान् यदि मे न हि रक्षकः
कथमहो मम जीवनमत्र वै || 22 ||

दह दह कृपया त्वं व्याधिजालं विशालं
हर हर करवालं चाल्पमृत्योः करालं |
निजजनपरिपालं त्वां भजे भावयालं
कुरु कुरु बहुकालं जीवितं मे सदाऽलं || 23 ||

न यत्र धर्माचरणं न जानं
व्रतं न योगो न च विष्णुचर्चा |
न पितृगोविप्रवरामरार्चा
स्वल्पायुषस्तत्र जना भवंति || 24 ||

अथ मंत्रं |
क्लीं श्रीं क्लीं श्रीं नमो भगवते जनार्दनाय सकल दुरितानि नाशय नाशय |
क्षौं आरोग्यं कुरु कुरु | ह्रीं दीर्घमायुर्देहि देहि स्वाहा ||

फलश्रुतिः |
अस्य धारणतो जापादल्पमृत्युः प्रशाम्यति |
गर्भरक्षाकरं स्त्रीणां बालानां जीवनं परं || 1 ||

शतं पंचाशतं शक्त्याऽथवा पंचाधिविंशतिं |
पुस्तकानां द्विजेभ्यस्तु दद्याद्दीर्घायुषाप्तये || 2 ||

भूर्जपत्रे विलिख्येदं कंठे वा बाहुमूलके |
संधारयेद्गर्भरक्षा बालरक्षा च जायते || 3 ||

सर्वे रोगा विनश्यंति सर्वा बाधाः प्रशाम्यति |
कुदृष्टिजं भयं नश्येत् तथा प्रेतादिजं भयं || 4 ||

मया कथितमेतत्तेऽमृतसंजीवनं परं |
अल्पमृत्युहरं स्तोत्रं मृतवत्सत्वनाशनं || 5 ||

इति सुदर्शनसंहितोक्तं अमृतसंजीवन धन्वंतरि स्तोत्रं ||